रजतजयन्तीग्रन्थमाला-20

# वैज्ञानिकषाणमुखम्



पुल्लेलश्रीरामचन्द्रुडु

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

रजतजयन्तीग्रन्थमाला-20

# वैज्ञानिकषाण्मुखम्

पुल्लेलश्रीरामचन्द्रुडु

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# प्राक्कथनम्

'योऽनूचानः स नो महान्' इत्यागमस्योद्घोषं परिदधत् स्वोद्देश्यं साधु निर्वहदिदं राष्ट्रियसंस्कृतसंस्थानं रजतजयन्तीवर्षं समपूरयदिति विज्ञाय समेषां संस्कृतानुरागिणां विदुषाञ्च चेतोऽवश्यं मोमुद्येत ।

प्राचीनशास्त्राणां ज्ञाननिधीनां संरक्षणसंवर्द्धनाभ्यां सह संस्कृतपरम्पराया राष्ट्रियैकात्मतासंवर्द्धनशक्तेश्च प्रचारार्थं संस्थानस्य योगदानं सुविदितमेव संस्कृतजगति ।

संस्थानस्य रजतजयन्तीमभिलक्ष्य तदङ्गत्वेन राष्ट्रस्यास्य विभिन्नप्रान्तेषु विद्योतमानैर्विद्वत्तल्लजैः विविधशास्त्रविषयानवलम्ब्य विरचितानि ग्रन्थकुसुमानि सादरं सङ्ग्रथ्य **रजतजयन्तीग्रन्थमालात्वेन** तत्रभवतां समक्षं प्रस्तूय महदानन्द-मनुभवामः ।

तत्रायं **वैज्ञानिकषाणमुखनामा** ग्रन्थः राष्ट्रपतिसम्मानितैः उस्मानिया-विश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरैः **प्रोफेसर-पुल्लेल श्रीरामचन्द्रुडुमहाशयैः** प्रणीतः; पाणिनिः, कणादः, कौटिल्यः, आर्यभटः, वराहमिहिरः, भास्कराचार्य इति षण्णां प्राचीनाचार्याणां कृत्स्नं शास्त्रं निष्पीड्य शास्त्रस्य वैज्ञानिकविवेचनं तत्सिद्धान्तानां प्रासङ्गिकताञ्च सप्रमाणमुपस्थापयति । विविधशैक्षणिककार्यक्रमेषु व्यापृतेषु सत्स्वपि अस्मदनुरोधमुररीकृत्य ग्रन्थममुं रचितवद्भ्यः प्रोफेसर-श्रीरामचन्द्रुडुमहोदयेभ्यः संस्थानं हार्दिकीं कृतज्ञतां ज्ञापयति ।

# विषय सूची


| क्र. सं. विषयः | पृष्ठ संख्या |
| --- | --- |
| १. पाणिनिः | १ |
| २. कणादः | २७ |
| ३. कौटिल्यः | ३९ |
| ४. आर्यभटः | ६९ |
| ५. वराहमिहिरः | ७९ |
| ६. भास्कराचार्यः | ९५ |
| ७. परामृष्टेपु ग्रन्थेषु प्रधानानां नामानि | ११३ |

# कणादः

## (क्रिस्तोः पूर्वं षष्ठशताब्दी)

कश्यपगोत्रीयः **कणादः** उलूकस्य पुत्रः। अत एवास्य 'काश्यपः' 'औलूक्यः' इति नामनी अपि प्रसिद्धे। अयम् अलहाबाद-मण्डल-(जिला) गते पभोसानाम्नि (अद्यतन) प्रभास-ग्रामे अवसत्। **सोमशर्मणः** शिष्यः। अयं कणादः **न्यायदर्शन**-प्रवर्तकस्य **गौतमस्य** सब्रह्मचारी इति **वायुपुराणे** उक्तम्। "कणाद इति तस्य कापोतीं वृत्तिमनुतिष्ठतो रथ्यानिपतितांस्तण्डुलकणानादाय प्रत्यहं कृताहारनिमित्ता" इति **न्यायकन्दलीकारः** अस्य 'कणाद' नामधेयहेतुं न्यगदत्। अणुसिद्धान्तस्य प्रवर्तनेनासौ 'कणादं' आसीदिति केचिद्वदन्ति। अयं क्रिस्तोः पूर्वं षष्ठशताब्द्याम् आसीत्। अनेन ईश्वरानुगृहीतेन वैशेषिकशास्त्रं निरमायीति वैशेषिकसूत्रभाष्यकृता **प्रशस्तपादेन** न्यगदि—

**योगाचारविभूत्या यस्तोषयित्वा महेश्वरम्।**
**चक्रे' वैशेषिकं शास्त्रं तस्मै कणभुजे नमः॥** इति

प्रसन्नेन महेश्वरेणास्मै उलूकरूपेणागत्य शास्त्रमुपदिष्टमिति च काचित्किंवदन्ती।

**कणादः** वैशेषिकदर्शनं सप्तत्युत्तरशतत्रयेण सूत्राणां निबबन्ध। दश अध्यायाः, प्रत्यध्यायं च द्वे द्वे आह्निके स्तः। ग्रन्थस्य प्रारम्भः "अथातो धर्मं व्याख्यास्यामः" (१.१.१) इति सूत्रेण कृतः। "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति द्वितीयसूत्रेण धर्मस्य लक्षणं प्रत्यपादि। धर्मबोधनेनैव प्रामाण्यं वेदस्य इति प्रतिपादयति—"तद्वचनादाम्नायस्य प्रामाण्यम्" इति तृतीयं सूत्रम्। एवं धर्मप्रतिपादनपरत्वेनास्य शास्त्रस्य प्रारम्भात् शास्त्रमिदं मीमांसाशास्त्रेण संबद्धम्, अथवा

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली